শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ১৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ১৫

*কপিলোপদেশম্*

মতিরিহ গুণসক্তা বন্ধকৃত্তেষ্ৱসক্তা
    ত্ৱমৃতকৃদুপরুন্ধে ভক্তিযোগস্তু সক্তিম্।
মহদনুগমলভ্যা ভক্তিরেৱাত্র সাধ্যা
    কপিলতনুরিতি ত্ৱং দেৱহূত্যৈ ন্যগাদীঃ॥ ১ ॥

প্ৰকৃতিমহদহঙ্কারাশ্চ মাত্রাশ্চ ভূতা-
    ন্যপি হৃদপি দশাক্ষী পূরুষঃ পঞ্চৱিংশঃ।
ইতি ৱিদিতৱিভাগো মুচ্যতেসৌ প্ৰকৃত্যা
    কপিলতনুরিতি ত্ৱং দেৱহূত্যৈ ন্যগাদীঃ॥ ২ ॥

প্ৰকৃতিগতগুণৌঘৈর্নাজ্যতে পূরুষোযং
    যদি তু সজতি তস্যাং তদ্গুণাস্তং ভজেরন্।
মদনুভজনতত্ত্বালোচনৈঃ সাপ্যপেযাত
    কপিলতনুরিতি ত্ৱং দেৱহূত্যৈ ন্যগাদীঃ॥ ৩ ॥

ৱিমলমতিরুপাত্তৈরাসনাদ্যৈর্মদঙ্গং
    গরুডসমধিরূঢং দিৱ্যভূষাযুধাঙ্কম্।
রুচিতুলিততমালং শীলযেতানুৱেলং
    কপিলতনুরিতি ত্ৱং দেৱহূত্যৈ ন্যগাদীঃ॥ ৪ ॥

মম গুণগণলীলাকর্ণনৈঃ কীর্তনাদ্যৈঃ
    মযি সুরসরিদোঘপ্ৰখ্যচিত্তানুৱৃত্তিঃ।
ভৱতি পরমভক্তিঃ সা হি মৃত্যোর্ৱিজেত্রী
    কপিলতনুরিতি ত্ৱং দেৱহূত্যৈ ন্যগাদীঃ॥ ৫ ॥

www.prapatti.com

অহহ বহুলহিংসাসঞ্চিতার্থৈঃ কুটুম্বং
প্রতিদিনমনুপুষ্ণন্ স্ত্রীজিতো বাললালী।
ৰিশতি হি গৃহসক্তো যাতনাং ময্যভক্তঃ
কপিলতনুরিতি ত্বং দেৰহূত্যৈ ন্যগাদীঃ॥ ৬ ॥

যুৰতিজঠরখিন্নো জাতবোধোপ্যকাণ্ডে
প্রসৰগলিতবোধঃ পীডযোল্লঙ্ঘ্য বাল্যম্।
পুনরপি বত মুহ্যত্যেৰ তারুণ্যকালে
কপিলতনুরিতি ত্বং দেৰহূত্যৈ ন্যগাদীঃ॥ ৭ ॥

পিতৃসুরগণযাজী ধার্মিকো যো গৃহস্থঃ
স চ নিপততি কালে দক্ষিণাধ্ৰোপগামী।
মযি নিহিতমকামং কর্মতূদকপথার্থং
কপিলতনুরিতি ত্বং দেৰহূত্যৈ ন্যগাদীঃ॥ ৮ ॥

ইতি সুৰিদিত ৰেদ্যাং দেৰ হে দেৰহূতিং
কৃতনুতিমনুগৃহ্য ত্বং গতো যোগিসঙ্ঘৈঃ।
ৰিমলমতিরথাসৌ ভক্তিযোগেন মুক্তা
ত্বমপি জনহিতার্থং ৰর্তসে প্রাগুদীচ্যাম্॥ ৯ ॥

পরম কিমু বহূক্ত্যা ত্বতপদাম্ভোজভক্তিং
সকলভযৰিনেত্রীং সর্বকামোপনেত্রীম্।
ৰদসি খলু দৃঢং ত্বং তদ্বিধূযামযান্ মে
গুরুপৱনপুরেশ ত্বয্যুপাধতস্ব ভক্তিম্॥ ১০ ॥

**********